श्री स्कंदलहरी

श्री स्कंदलहरी

श्रियै भूयाः श्रीमच्छरवणभव त्वं शिवसुतः
प्रियप्राप्त्यै भूयाः प्रतनगजवक्त्रस्य सहज |
त्वयि प्रेमोद्रेकात्प्रकटवचसा स्तोतुमनसा
मयाऽऽरब्धं स्तोतुं तदिदमनुमन्यस्व भगवन् || 1 ||

निराबाधं राजच्छरदुदितराकाहिमकर
प्ररूढज्योत्स्नाभास्मितवदनषट्कस्त्रिणयनः |
पुरः प्रादुर्भूय स्फुरतु करुणापूर्णहृदयः
करोतु स्वास्थ्यं वै कमलदलबिंदूपमहृदि || 2 ||

न लोकेऽन्यं देवं नतजनकृतप्रत्ययविधिं
विलोके भीतानां निखिलभयभीतैकशरणं |
कलौ कालेऽप्यंतर्हरसि तिमिरं भास्कर इव
प्रलुब्धानां भोगेष्वपि निखिलभोगान्वितरसि || 3 ||

शिव स्वामिन् देव श्रितकलुषनिःशेषण गुरो
भवध्वांतध्वंसे मिहिरशतकोटिप्रतिभट |
शिवप्राप्त्यै सम्यक्फलित सदुपायप्रकटन
ध्रुवं त्वत्कारुण्ये कलिरपि कृती भूतविभवः || 4 ||

अशक्तानां कर्मस्वपि निखिलनिःश्रेयसकृतौ
पशुत्वग्रस्तानां पतिरसि विपाशत्वकलने |
प्रशस्तानां भूम्नां निधिरसि निरोद्धा निजशुचा-
-मशक्तानां कर्ता जगति धृतशक्तिः किल भवान् || 5 ||

रुषार्तानां हर्ता विषयिविषयाणां घटयिता
तृषार्तानां काले परममृतवर्षी घन इव |
मृषाज्ञानार्तानां निखिलविचिकित्सापरिहरो
विषग्रस्तानां त्वं सकलभयहर्ता विलससि || 6 ||

रसाधिक्यं भक्तैरधिकमधिकं वर्धय विभो
प्रसीद त्वं भूयः प्रकटय चिदानंदलहरीं |
असारे संसारे सदसति न लिप्तं मम मनः
कुसीदं भूयान्मे कुशलवति निःश्रेयसपथे || 7 ||

महामोहारण्ये विचरति मनस्तन्नियमय-
-न्नहंतां निःशेषीकुरु करुणया त्वं स्नपय मां |
महीयो माहात्म्यं तव मननमार्गे स्फुरतु मे
महस्स्तोमाकारे त्वयि मतिजुषि स्यात्क्व नु तमः || 8 ||

वलक्षाभं स्निग्धं वदनकमलेभ्यः प्रसृमरं
मिलत्कारुण्यार्द्रं मृदितभुवनार्ति स्मितमिदं |
पुलिंदापत्यस्य प्रकटपुलकोद्रेकजनकं
दलद्दैन्यं खेदं हरतु सततं नः सुरगुरो || 9 ||

अतीतो ब्रह्मादीन् कृतिमुखकृतः कारणपतीन्
क्षितिस्तोयं वह्निर्मरुदसि वियत्तत्वमखिलं |
पतिः कृत्यानां त्वं परिणतचिदात्मेक्षणवतां
धृतिस्त्वं ध्यातः सन् दिशसि निजसायुज्यपदवीं || 10 ||

त्वदात्मा त्वच्चित्तस्त्वदनुभवबुद्धिस्मृतिपथः
त्वया व्याप्तं सर्वं जगदिदमशेषं स्थिरचरं | [त्वदालोकः]
सदा योगी साक्षाद्भजति तव सारूप्यममलं
त्वदायत्तानां किं न हि सुलभमष्टौ च विभवाः || 11 ||

कति ब्रह्माणो वा कति कमलनेत्राः कति हराः
कति ब्रह्मांडानां कति च शतकोटिष्वधिकृताः |
कृताज्ञाः संतस्ते विविधकृतिरक्षाभृतिकराः
अतः सर्वैश्वर्यं तव यदपरिच्छेद्यविभवं || 12 ||

नमस्ते स्कंदाय त्रिदशपरिपालाय महते
नमः क्रौंचाभिख्यासुरदलनदक्षाय भवते |
नमः शूरक्रूरत्रिदशरिपुदंडाध्वरकृते
नमो भूयो भूयो नतिकृदवने जागरवते || 13 ||

शिवस्त्वं शक्तिस्त्वं तदुभयतमैक्यं पृथगसि
स्तवे ध्याने पूजाजपनियममुख्येष्वभिरताः |
भुवि स्थित्वा भोगान् सुचिरमुपभुज्य प्रमुदिताः
भवंति स्थाने तत्तदनु पुनरावृत्तिविमुखाः || 14 || [त्वत्]

गुरोर्विद्यां लब्ध्वा सकलभयहंत्रीं जपपराः
पुरश्चर्यामुख्यक्रमविधिजुषो ध्याननिपुणाः |
व्रतस्थैः कामौघैरभिलषितवांछां प्रियभुज-
-श्चिरं जीवन्मुक्ता जगति विजयंते सुकृतिनः || 15 ||

शरज्ज्योत्स्नाशुभ्रं स्फटिकनिकुरुंबाभरुचिरं
स्फुरन्मुक्ताहारं धवळवसनं भावयति यः |
प्ररोहत्कारुण्यामृतबहुलधाराभिरभित-
-श्चिरं सिक्तात्मा वै स भवति च विच्छिन्ननिगडः || 16 ||

वृथा कर्तुं दुष्टान्विविधविषवेगान् शमयितुं
सुधारोचिष्कोटिप्रतिभटरुचिं भावयति यः |
अधः कर्तुं साक्षाद्भवति विनतासूनुमचिरा-
-द्बिधत्ते सर्पाणां विविधविषदर्पापहरणं || 17 ||

प्रवालाभापूरे प्रसरति महस्ते जगदिदं
दिवं भूमिं काष्ठाः सकलमपि संचिंतयति यः |
द्रवीकुर्याच्चेतस्त्रिदशनिवहानामपि सुखा-
-द्भुवि स्त्रीणां पुंसां वशयति तिरश्चामपि मनः || 18 ||

नवांभोदश्यामं मरकतमणिप्रख्यमथवा
भवंतं ध्यायेद्यो भवति निपुणो मोहनविधौ |
दिविष्ठानां भूमावपि विविधदेशेषु वसतां
नृणां देवानां वा वियति चरतां पत्त्रिफणिनां || 19 ||

कुमार श्रीमंस्त्वां कनकसदृशाभं स्मरति यः
समारब्धस्तंभे सकलजगतां वा प्रभवति |
समस्तद्युःस्थानां प्रबलपृतनानां सवयसां
प्रमत्तव्याघ्राणां किटिहयगजानां च सपदि || 20 ||

छटात्कारैः साकं सहकृतमहाधूमपटल-
-स्फुटाकारं साक्षात्स्मरति यदि मंत्री सकृदपि |
हठादुच्चाटाय प्रभवति मृगाणां स पततां
पटुर्विद्वेषे स्याद्विधिरचित पाशं विघटयन् || 21 ||

स्मरन्घोराकारं तिमिरनिकुरुंबस्य सदृशं
जपन्मंत्रान् मर्त्यः सकलरिपुदर्पक्षपयिता |
स रुद्रेणौपम्यं भजति परमात्मन् गुह विभो
वरिष्ठः साधूनामपि च नितरां त्वद्भजनवान् || 22 ||

महाभूतव्याप्तं कलयति च यो ध्याननिपुणः
स भूतैः संत्यक्तस्त्रिजगति च योगेन सरसः |
गुह स्वामिन्नंतर्दहरयति यस्त्वां तु कलयन्
जहन्मायो जीवन्भवति स विमुक्तः पटुमतिः || 23 ||

शिवस्वामिन् गौरीप्रियसुत मयूरासन गुहे-
-त्यमून्युक्त्वा नामान्यखिलदुरितौघान् क्षपयति |
इहासौ लोके तु प्रबलविभवः सन् सुविचरन्
विमानारूढोऽंते तव भजति लोकं निरुपमं || 24 ||

तव श्रीमन्मूर्तिं कलयितुमनीशोऽहमधुना
भवत्पादांभोजं भवभयहरं नौमि शरणं |
अतः सत्याद्रीश प्रमथगणनाथात्मज विभो
गुह स्वामिन् दीने वितनु मयि कारुण्यमनिशं || 25 ||

भवायानंदाब्धे श्रुतिनिकरमूलार्थमखिलं
निगृह्य व्याहर्तुं कमलजमसक्तं तु सहसा |
ब्रुवाणस्त्वं स्वामिक्षितिधरपते देशिकगुरो
गुह स्वामिन् दीने मयि वितनु कारुण्यमनिशं || 26 ||

अगस्त्यप्रष्ठानाममलहृदयाब्जैकनिलयं
सकृद्वा न ध्यातं पदकमलयुग्मं तव मया |
तथापि श्रीजंति स्थलनिलय देवेश वरद
गुह स्वामिन् दीने मयि वितनु कारुण्यमनिशं || 27 ||

रणे हत्वा शक्त्या सकलदनुजांस्तारकमुखान्
हरिब्रह्मेंद्राणामपि सुरमुनीनां भुवि नृणां |
मुदं कुर्वाणः श्रीशिवशिखरिनाथ त्वमखिलां
गुह स्वामिन् दीने मयि वितनु कारुण्यमनिशं || 28 ||

शरद्राकाजैवातृक विमलषड्वक्त्रविलस-
-द्द्विषड्बाहो शक्त्या विदलितमहाक्रौंचशिखरिन् |
हृदावास श्रीहल्लकगिरिपते सर्वविदुषां
गुह स्वामिन् दीने मयि वितनु कारुण्यमनिशं || 29 ||

महांतं केकींद्रं वरद सहसाऽऽरुह्य दिविष-
-द्गणानां सर्वेषामभयद मुनीनां च भजतां |
वलारातेः कन्यारमण बहुपुण्याचलपते
गुह स्वामिन् दीने मयि वितनु कारुण्यमनिशं || 30 ||

महद्ब्रह्मानंदं परशिवगुरुं संततलस-
-त्तटित्कोटिप्रख्यं सकलदुरितार्तिघ्नममलं |
हरिब्रह्मेंद्रामरगणनमस्कार्यचरणं
गुहं श्रीसंगीतप्रियमहमंतर्हृदि भजे || 31 ||

इति स्कंदलहरी |